QP CODE: 26019430

26019430

Reg No : ....................

Name : ....................

# MA DEGREE ( CSS) EXAMINATION MARCH 2026

## Fourth Semester

M A SANSKRIT SPECIAL (VYAKARANA) - REVISED

## ELECTIVE - SA890403 - TRANSLATION

2019 Admission Onwards

94B9D78D

Time: 3 Hours Weightage: 30

**Part A (Short Answer Questions)**

*Answer any **eight** questions.*

*Weight **1** each.*

1. प्रतीयते विधीयत इति प्रत्ययः। अविधीयमानः अण् उदिच्च सवर्णस्य संज्ञा स्यात्। अत्राण् परेम णकारेण। कु, चु, टु, तु पु एते उदितः। तदेवम् अ इत्यष्टादशानां संज्ञा। तथेकारोकारौ। ऋकारस्त्रिंशतः। एवं लृकारोऽपि। एचो द्वादशानाम्। एतैतोः ओदौतोश्च न मिथः सावर्ण्यम्। ऐ औजिति सूत्रारम्भसामर्थ्यात्।
2. From this point forward upto the aphorism Adhirisvare, all that we shall say is to be understood to have the name of Nipata or particles. The words beginning with bhu to become, and denoting action, are called dhatu or verbal roots.
3. The closest proximity of letters, (there being the intervention of half a matra or prosodial length between them) is called contact or sanhita. That which ends in sup is called a pada or inflected word.Consonants unseparated by vowels are called conjunct consonants.
4. . सप्तमीनिर्दे शेन विधीयमानं कार्यं वर्णान्तरेण अव्यवहितस्य पूर्वस्य बोध्यम्। प्रसङ्गे सति सदृशतम आदेशःस्यात्। सत्र अनेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः। अनिर्धारितसम्बन्धविशेषा षष्ठी स्थानेयोगा बोध्या। अचां मध्ये यो अन्त्यः तस्मात् परः तस्यैव अन्तावयवो मित्स्यात्।
5. अकः सवर्णे दीर्घः-अकः सवर्णे अचि परे दीर्घः एकादेस- स्यात्। एङः पदान्तादति-पदान्तादेङः अति परे पूर्वरूपमेकादेशः स्यात्। सर्वत्र विभाषा गोः- लोके वेदे च एङन्तस्य गोरति वा प्रकृतिभावः स्यात्पदान्ते। अवङ् स्फोटोयनस्य- अचि परे पदान्ते गोरवङ् वा स्यात्।
6. Then at dawn, the king whose wealth was fame, released for (grazing in) the forest the cow of the sage who was made to accept sandal and followers from his wife and whose calf was tied up after it had drunk milk.
7. अथानुरूपाभिनिवेशतोषिणा कृताभ्यनुज्ञा गुरुणा गरीयसा। प्रजासुपश्चात्प्रथितं तदाख्यया जगाम गौरी शिखरं शिखण्डिमत्।।
8. निमित्तमुद्दिश्य हि यः प्रकुप्यति ध्रुवं स तस्यापगमे प्रसीदति। अकारणद्वेषि मनस्तु यस्य वै कथं जनस्तं परितोषयिष्यति।।
9. अर्था गृहे निवर्तन्ते श्मशाने मित्रबान्धवाः। सुकृतं दुष्कृतं चैव गच्छन्तमनुगच्छन्ति।।
10. एकदा धाराधिपो भोजः विक्रमार्केण अधिरूढपूर्वं दिव्यं सिंहासनं प्राप। यथाशास्त्रं सर्वाणि शुभकर्माणि परिसमाप्य यावत्सिंहासनमारोढुमारभत तावत् प्रथम सोपानपदे स्थिता सालभञ्जिका राजानं मनुष्यवाचा बभाषे- भो राजन् यदि भवान् विक्रमार्क इव दयाशौर्यौदार्यादि गुणसम्पन्नः तर्हि सिंहासनेऽस्मिन्नुपवेष्टुमर्हति।

(8×1=8 weightage)

**Part B (Short Essay/Problems)**

*Answer any **six** questions.*

*Weight **2** each.*

11. संयोगान्तस्य लोपः। संयोगान्तं यत् पदं तदन्तस्य लोपः स्यात्। आदेशः स्थानिवत् स्यात् न तु स्थान्यलाश्रयविधौ।प्रसक्तस्य अदर्शनं लोपसंज्ञं स्यात्। परनिमित्तः अजादेशोःस्थानिवत् स्यात् स्थानिभीतादचः पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये। पदस्य चरमावयवे द्विर्वचनादौ च कर्तव्ये परनिमित्तो अजादेशः न स्थानिवत्।प्रसक्तस्य अदर्शनं लोपसंज्ञं स्यात्।

12. यादौ प्रत्यये परे धातोरेचः चेत् वान्तादेशः तर्हि तन्निमित्तस्यैव नान्यस्य। अवर्णपूर्वयोः पदान्तयोः यवयोः वा लोपः अशि परे। पूर्वत्रासिद्धमिति लोपशास्त्रस्यासिद्धत्वात् न स्वरसन्धिः। ऋ इति त्रिंशतःसंज्ञा इत्युक्तम्। तत्स्थाने यो अण् स रपरः सन्नेव प्रवर्तते।

13. एत्येधत्यूठ्सु-अवर्णादजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः स्यात्। वा सुप्यापिशलेः- अवर्णान्तादुपसर्गादृकारादौ सुब्धातौ परे वृद्धिर्वा स्यात्। खरवसानयोर्विसर्जनीयः-खरि अवसाने च परे रेफस्य विसर्जनीयः स्यात् पदान्ते।ओमाङोश्च-ओमि आङि च आत्परे पररूपमेकादेशः स्यात्।ध्वनेरनुकरणस्य यो ऽच्छब्दस्तमादितौ परे पररूपमेकादेशः स्यात्।

14. मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः। पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः।। इति ध्रुवेच्छामनुशासती सुतां शशाक मेना न नियन्तुमुद्यमात्। क ईप्सितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत्।।

15. अधुना यूयं दैत्यैः सह सन्धिं कुरुत इति हरिः देवान् उवाच। भो गुरो परैः अभिभूतानां अस्माकं विजयमार्गं उपदिशतु भवान् । वयं वनात् फलानि आहरेम। नगरादागताः ते जनाः स्नानाय नदीं गच्छन्तु। सदा ते धर्मे रतिरस्तु। आवां ईप्सितार्थलाभेन मोदेवहि। ताः कन्यकाः अनुरूपान् पतीन् विन्देरन्। विश्रामहेतोः नीचैराख्यं गिरिं अधिवसेः। यदि तव कुमारः विमार्गात् निवर्तेत तर्हि शोभनं भवेत्।

16. Valin was killed by Rama with a single arrow. The court of king Vikramaditya was adorned by nine gems of poets. Bhagiratha did penance and brought Ganga from heaven to the earth. All kings of the world were invited by king Bhoja for the Svayamvara of his sister Indumati. By cutting trees and killing animals, one cannot go to heaven. How can a man be trusted without knowing his conduct. Having entrusted Vasavadatta in the hands of Padmavati, Yaugandharayana departed.

17. समिद्भिरग्निं हुत्वा ब्रह्मचारी प्रार्थयते- 'मेधावी भूयासम्, तेजस्वी भूयासम् इत्यादि' विधेयासुर्देवाः परमरमणीयां परिणतिम्। तत्किमन्यदाशास्महे, केवलं वीरप्रसवा भूयाः। अथ राक्षसः प्रियसुहृदि चन्दनदासे कलत्रं पुत्रं च निक्षिप्य रात्रौ कुसुमपुरान्निरगात्। अपाम सोमममृता अभूम। वैदेहि विषयान्तरस्थं पितुर्निकेतं प्राप्तासि, तन्मा व्यथिष्ठाः. इति वाल्मीकिरवोचत्।

18. पुरा चन्द्रवंश्यो दुष्यन्तो नाम राजा मृगयां कर्तुम् कदाचित् ससैन्यो वनमियाय। तत्र च कमपि परिणमनुधावन् महर्षेः कण्वस्याश्रमं विवेश। तदा कण्वः आश्रमे नासीत्। परं तस्य कृतवदुहिता शकुन्तला राजानमुचितेन सत्कारेण पूजयामास। राजर्षेः विश्वामित्रस्य मेनकायामुत्पन्नां तामात्मनोऽनुरूपां मत्वा राजा तां परिणेतुकामः बभूव। शकुन्तलाया अपि तस्मिन्ननुरागः समजनि। ततः गांधर्वेण विवाहविधिना तां परिणीय तया सह कंचित्कालमुषित्वा दुष्यन्तः त्वां नगरमानेतुं शीघ्रमेवाप्तजनान् प्रेषयामि इति प्रतिज्ञाय नगरं प्रतिनिवृत्तः।

(6×2=12 weightage)

**Part C (Essay Type Questions)**

*Answer any **two** questions.*

*Weight **5** each.*

19. These fourteen aphorisms are called " the Mahesvara Sutra" or the aphorisms of Mahesvara. They are useful for forming technical terms or Pratyaharas like अण् etc. The final consonants in these (eg.ण्,क्) are called इत् a word which is defined later on. The अ in the Sutra लण् is also इत्. The अ in the other consonants like ह य व etc is not इत्, but only for pronunciation. Upadesa means the first enunciation of a term in Grammar. (Really it is the name of those technical terms of grammar which are formed for this purpose of instructions only, but which are not the current words of the language). Thus we get the sanjnas or terms like अच् and अ ण् etc.

20. There is reduplication of yar, ie all the consonants except ह् after the letters र् abd ह् following a vowel.After a consonant, the following semi-vowel or nasal is elided optionally, when the same letters follow it. For the vowels ए,ऐ,ओ,औ are respectively substituted अय्, आय्, अव्, आय् when a vowel follows. The substitution of अव्and आव् for ओ and औ also takes place before an affix beginning with य.

21. स न्यस्तचिह्नामपि राजलक्ष्मीं तेजोविशेषामनुमितां दधानः। आसीदनाविष्कृतदानराजिः अन्तर्मदावस्थ इव द्विपेन्द्रः।। लताप्रतानोद्ग्रथितैः केशैरधिज्यधन्वा विचचार दावम्। रक्षापदेशान्मुनिहोमधेनोः वन्यान् विनेष्यन्निव दुष्टसत्वात्।। स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः। जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत्।।

22. कूजन्तं राम रामेति मधुरं मधुराक्षरम्। आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम्।। अङ्काधिरूढं शिशुगोपवेषं स्तनं धयन्तं कमलैककान्तम् संबोधयामास मुदा यशोदा गोविन्द दामोदर माधवेत्।। पयः पानं भुजङ्गानां केवलं विषवर्धनम्। उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये।।

(2×5=10 weightage)